तोलनीयम्, तुतोलयिषणीयम्; तोल्यम्, तुतोलयिष्यम्; ईषत्तोलः-दुस्तोलः-सुतोलः; तोल्यमानः, तुतोलयिष्यमाणः; तोलः, तुतोलयिषः; तोलयितुम्, तुतोलयिषितुम्; तोलना-[1]तुलना, तुला, तुतोलयिषा; तोलनम्, तुतोलयिषणम्; तोलयित्वा, तुतोलयिषित्वा; प्रतोल्य, प्रतुतोलयिष्य; तोलम् २, तोलयित्वा २, } तुतोलयिषम् २; तुतोलयिषित्वा २.}

## (758) "तुष प्रीतौ" (IV-दिवादिः-1184. अक. अनि. पर.)

प्रीतिः=तृप्तिः।

तोषकः-षिका, तोषकः-षिका, [2]तुतुक्षकः-क्षिका, तोतुषकः-षिका;
तोष्टा-ष्ट्री, तोषयिता-त्री, तुतुक्षिता-त्री, तोतुषिता-त्री;
[3]तुष्यन्-न्ती, तोषयन्-न्ती, तुतुक्षन्-न्ती; —
[4]तोक्ष्यन्-न्ती-ती, [5]तोषयिष्यन्-न्ती-ती, तुतुक्षिष्यन्-न्ती-ती; —
— तोषयमाणः, तोषयिष्यमाणः, — तोतुष्यमाणः, तोतुषिष्यमाणः;
तुट्-तुषौ-तुषः; — — —
तुष्टम्-ष्टः-ष्टवान्, तोषितः, तुतुक्षितः, तोतुषितः-तवान्;
तुषः, तोषः, तुतुक्षुः, तोतुषः;
तोष्टव्यम्, तोषयितव्यम्, तुतुक्षितव्यम्, तोतुषितव्यम्;
तोषणीयम्, तोषणीयम्, तुतुक्षणीयम्, तोतुषणीयम्;

---

1. बाहुलकाद् गुणाभावे रूपम्। 'चिन्तिपूजि—' (3-3-105) इत्यत्र चकारात् तुला' इति क्षीरस्वामी। माधवधातुवृत्तौ तु—'तुला इति 'णिचोऽनित्यत्वात्' इति मैत्रेयः। अन्ये तु 'णिजभावे प्रमाणाभावात् 'तुल्यार्थैः—' (2-3-62) इत्यादौ तुला इति निपातनादङि णिलुकि तुला इति।' इत्युक्तम्।
2. 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वम्। 'षढोः कः सि' (8-2-41) इति धातुषकारस्य ककारः। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
3. 'दिवादिभ्यः—' (3-1-69) इति श्यन् विकरणप्रत्ययः। तस्य ङिद्वद्भावादङ्गस्य गुणो न।
4. 'षढोः कः सि' (8-2-41) इति धातुषकारस्य ककारः।
5. 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इत्यनेन ण्यन्तात् चित्तवत्कर्तृकत्वे परस्मैपदमेव। अचित्तवत्कर्तृकत्वे तु आत्मनेपदमपि भवति।